MAMTA SINGH

Class 7

Subject Sanskrit

TOPIC subhashitani

प्रथमः पाठः

# सुभाषितानि



पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥



Scanned with CamScanner

**Q2 :**

यथायोग्यं श्लोकांशान् मेलयत-

| क | ख |
| --- | --- |
| धनधान्यप्रयोगेषु | नासद्भिः किञ्चिदाचरेत्। |
| विस्मयो न हि कर्त्तव्यः | त्यक्तलज्जः सुखी भवेत्। |
| सत्येन धार्यते पृथ्वी | बहुरत्ना वसुन्धरा। |
| सद्भिर्विवादं मैत्रीं च | विद्यायाः संग्रहेषु च। |
| आहारे व्यवहारे च | सत्येन तपते रविः। |

**Solution :**

| क | ख |
| --- | --- |
| धनधान्यप्रयोगेषु | विद्यायाः संग्रहेषु च। |
| विस्मयो न हि कर्त्तव्यः | बहुरत्ना वसुन्धरा। |
| सत्येन धार्यते पृथ्वी | सत्येन तपते रविः। |
| सद्भिर्विवादं मैत्रीं च | नासद्भिः किञ्चिदाचरेत्। |
| आहारे व्यवहारे च | त्यक्तलज्जः सुखी भवेत्। |

Scanned with CamScanner

Q3 :
एकपदेन उत्तरत-

(क) पृथिव्यां कति रत्नानि?

(ख) मूढैः कुत्र रत्नसंज्ञा विधीयते?

(ग) पृथिवी केन धार्यते?

(घ) कैः सङ्गितं कुर्वीत?

(ङ) लोके वशीकृतिः का?

**Solution :**

(क) पृथिव्यां त्रीणि रत्नानि।

(ख) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(ग) पृथिवी सत्येन धार्यते।

(घ) सद्भिः सङ्गितं कुर्वीत।

(ङ) लोके वशीकृतिः क्षमा।

Scanned with CamScanner

**Q4 :**

रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) सत्येन वाति वायुः।

(ख) सद्भिः एव सहासीत।

(ग) वसुन्धरा बहुरत्ना भवति।

(घ) विद्यायाः संग्रहेषु त्यक्तलज्जः सुखी भवेत्।

(ङ) सद्भिः मैत्रीं कुर्वीत।

**Solution :**

(क) केन वाति वायु:?

(ख) काभि: एव सहासीत?

(ग) का बहुरत्ना भवति?

(घ) कस्या: संग्रहेषु त्यक्तलज्जः सुखी भवेत्?

(ङ) काभिः मैत्रीं कुर्वीत?

Scanned with CamScanner

**Q5 :**
प्रश्नानामुत्तराणि लिखत-

(क) कुत्रः विस्मयः न कर्त्तव्यः?

(ख) पृथिव्यां त्रीणि रत्नानि कानि?

(ग) त्यक्तलज्जः कुत्र सुखी भवेत्?

**Solution :**

(क) बहुरत्ना वसुन्धरा इति विस्मय: न कर्त्तव्य:।

(ख) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् सन्ति।

(ग) त्यक्तलज्ज: आहारे व्यवहारे च सुखी भवेत्।

Scanned with CamScanner

**Q6 :**

मञ्जूषातः पदानि चित्वा लिङ्गानुसारं लिखत-

| |
|---|
| रत्नानि वसुन्धरा सत्येन सुखी अन्नम् वह्निः र |

| **पुँल्लिङ्गम्** | **स्त्रीलिङ्गम्** | **नपुसंक** |
|---|---|---|
| ...................... | ...................... | ............ |
| ...................... | ...................... | ............ |
| ...................... | ...................... | ............ |

**Solution :**

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| सत्येन | वसुन्धरा | रत्नानि |
| रवि | पृथ्वी | सुखी |
| अन्नम् | वह्निः | सङ्गतिम् |

Scanned with CamScanner

**Q7 :**

अधोलिखितपदेषु धातव: के सन्ति?

| **पदम्** | **धातुः** |
|---|---|
| करोति | .............. |
| पश्य | .............. |
| भवेत् | .............. |
| तिष्ठति | .............. |

**Solution :**

| **पदम्** | **धातुः** |
|---|---|
| कर्त्तव्य: | कृ |
| पश्य | दृश् |
| भवेत् | भू |
| स्थित: | स्था |

Scanned with CamScanner